# श्लोकों का संस्कृत अर्थ - 5 अंक

1. पश्याम्येकं भासमिति द्रोणं पार्थोऽभ्यभाषत।
न तु वृक्षं भवन्तं वा पश्यामीति च भारत॥

**संस्कृतार्थ**—लक्ष्यवेधपरीक्षाकाले अर्जुनः द्रोणाचार्यम् अवोचद् यत्—हे गुरुदेव ! अहं तु न वृक्षम् अवलोकयामि न च श्रीमन्तमेव, अहं तु केवलमेकमात्रं खगमेव विलोकयामि।

2. ततो युधिष्ठिरः पूर्वं धनुर्गृह्य परन्तपः।
तस्थौ भासं समुद्दिश्य गुरुवाक्य प्रणोदितः॥

**संस्कृतार्थ**—गुरोः द्रोणाचार्यस्य पूर्वम् उक्तं 'दुर्धर्ष वाणं सन्धत्स्व मत् वाक्यान्ते तं विमुञ्च' इति कथनं श्रुत्वा प्रेरयित्वा च शत्रुनाशकः युधिष्ठिरः स्वहस्ते धनुः गृहीत्वा पक्षिणं लक्षयित्वा स्थितः।

3. भाषासु मुख्या मधुरा, दिव्या गीर्वाणभारती।
तस्माद्धि काव्यं मधुरं, तस्मादपि सुभाषितम्॥

**संस्कृतार्थ**—अस्मिन् श्लोके कविः कथयति यत् भारतीय समस्त भाषासु संस्कृत भाषा प्रमुखा भाषां अस्ति। सा अति मधुरा अपि अस्ति दिव्या चास्ति तस्मात् निश्चयेन काव्यम् मधुरम् अस्ति। तस्मादपि सूक्तयः मधुराः सन्ति। संस्कृत भाषायां सूक्तयः अति मधुराः सन्ति इत्यर्थः।

4. पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाण-खण्डेषु रत्न-संज्ञा विधीयते॥

**संस्कृतार्थ**—कवि: कथयति अस्मिन् धरातले त्रीणि रत्नानि सुवचनं, अन्नं च जलं विद्यते। अस्य विपरीतार्थ:मूर्खा: जना: एव पाषाण-खण्डान् गणयन्ति।

5. **काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।**
**व्यसनेन च मूर्खाणां निद्रया कलहेन वा॥**

**संस्कृतार्थ**—कवि: कथयति यत् ये पुरुषा: बुद्धिमन्त: भवन्ति ते स्व समयं काव्यादि ग्रन्थानां वा सद्-ग्रन्थानाम् अध्यनेन यापयन्ति यावच्च मूर्खा: जना: स्वसमयम् परस्पर कलहेन, निद्रया अथवा व्यसनै: यापयन्ति।

6. **श्लोकस्तु श्लोकतां याति यत्र तिष्ठन्ति साधव:।**
**लकारो लुप्यते तत्र यत्र तिष्ठन्त्यसाधव:॥**

**संस्कृतार्थ**—अस्मिन् संसारे यत्र सज्जना: निवसन्ति तत्र श्लोक: कीर्तिं जनयति। यत्र दुष्टा: निवसन्ति तत्र श्लोकस्य लकार वर्णस्य लोपात् शोक: इत्येव शब्द: शिष्ट: भवति।

7. **अप्राप्तं कालं वचनं वृहस्पतिरपि ब्रुवन।**
**प्राप्नुयाद् बुद्ध्यवज्ञानमपमानश्च शाश्वतम्॥**

**संस्कृतार्थ**—अस्मिन् श्लोके कवि: कथयति यत् नर: सदैव कालोचित वार्त्तालापं कुर्यात्। चेत् बृहस्पति: अपि कालोचित न वदति तदा स अपि निरन्तरण् बुद्धि अवज्ञानं अपमानवम् च प्राप्तं करोति।

8. **केयूरा: न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला:।**
**न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्द्धजा:॥**

**संस्कृतार्थ**—मनोहरा: केयूरा:, चन्द्र इव उज्ज्वला: हारा:, स्नानं, चन्दन चर्चितम् विलेपनम्, सुगन्धयुक्तं मनोहरञ्च, कुसुमं केशपाश: च पुरुषं न विभूषयन्ति, यत: इमे वास्तविकं भूषणं न सन्ति। एताम् आकर्षणम् क्षणभंगुरम् भवति।

9. **वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते।**
**क्षीयन्ते खलु भूषणानि सततं वाग्भूषणम् भूषणम्॥**

**संस्कृतार्थ**—अस्मिन् विश्वे एका वाणी, या अध्ययनेन विनयेन च संस्कृता धार्यते, सर्वोत्तमं भूषणं अस्ति। सा पुरुषं विभूषयन्ति। अन्यानि भूषणानि हि नष्टा: भवन्ति। वाग्भूषणं वास्तविकं भूषणम् अस्ति। य: कदापि न विनश्यति।

10. लक्ष्मीर्न या याचकदुःखहारिणी विद्या न याऽप्यच्युत-भक्तिकारिणी।
पुत्रो न यः पण्डितमण्डलाग्रणीः सा नैव सा नैव सा नैव।

**संस्कृतार्थ**—या श्रीः याचकानां दुःखं न परिहरति सा श्रीः श्रीः न भवति, या विद्या अपि भगवतः विष्णोः भक्तिं न जनयति सा विद्या अपि विद्या न भवति, यः च पुत्रः पण्डितानां समुदाये सर्वोपरि न तिष्ठति, सः पुत्रः अपि पुत्रपदभाजनं न।

11. अभिवादनशीलस्य, नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते, आयुर्विद्या यशोबलम्॥

Gyansindhu Coaching Classes

**संस्कृतार्थ**—अस्मिन् श्लोके मनुः कथयति यत् यः जनः स्वपूज्यानाम् प्रणमति, वृद्धानाम् सेवां करोति, तस्य जनस्य आयुः, विद्या, यशः, बलम् च इति चत्वारि वस्तूनि वर्धन्ते।

12. न स्नानमाचरेद् भुक्त्वा, नातुरो न महानिशि।
न वासोभिः सहाजस्त्रं, नाविज्ञाते जलाशये॥

**संस्कृतार्थ**—मानवः भोजनं कृत्वा, रुग्णावस्थायां, महानिशि, वस्त्रः सह अजस्त्रं अविज्ञाते जलाशये च स्नानं न कुर्यात्। यः इदृशम् आचरति, सः महाविनाशं प्राप्नोति।

13. आर्द्रपादस्तु भुञ्जीत्, नार्द्रपादस्तु संविशशेत्।
आर्द्रपादस्तु भुञ्जानो, दीर्घमायुरवाप्नुयात्॥

**संस्कृतार्थ**—अस्मिन् श्लोके कविः कथयति यत् नरः पादौ प्रक्षाल्य भोजनं कुर्यात्। आर्द्रपादौ कदापि न संविशेत्, आर्द्रपादः भोजनम् कुर्वन् नरः दीर्घायुः भवति।

14. सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम्।
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः॥

**संस्कृतार्थ**—महर्षिः मनुः सत्यभाषणस्य विषये नियमं कथयति यत् मनुष्यः सदा सत्यं वदेत्। तादृशं सत्यं न वदेत् यत् कस्यापि अप्रियं कटु च अस्ति। तादृशं प्रियम् अपि न वदेत् यत् सत्यं न अस्ति। इत्थं प्रकारेण सत्य-प्रिय-भाषणं सर्वेषां समीचीनः धर्मः अस्ति।

15. सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्।
एतद्विद्यात् समासेन, लक्षणं सुखदुःखयोः॥

**संस्कृतार्थ**—अस्मिन् संसारे यद्यपि पराधीनम् अस्ति तत्सर्वं दुःखस्वरूपम् अस्ति। यत् स्वाधीनम् अस्ति तत्सर्वं सुखस्वरूपम् अस्ति। पराधीनता दुःखस्य स्वाधीनता च सुखस्य संक्षेपेण लक्षणम् जानीयात्-इति व्यासेन महाभारते उक्तम्।

16. एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनः।
एकाकी चिन्तयानो हि, परं श्रेयोऽधिगच्छति॥

**संस्कृतार्थ**—अस्मिन् पद्ये एकान्तचिन्तनस्य महत्त्वं कविना प्रदर्शितम्। प्रत्येक मानवः एकान्तस्थले स्थित्वा प्रतिदिनं स्वहिताय चिन्तनम् कुर्यात्। यः मानवः नित्यप्रति एकाकी भूत्वा स्वहितकारणं विषयं प्रति चिन्तयति सः सर्वथा स्वकल्याणं प्राप्नोति।

17. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥

**संस्कृतार्थ**—अस्मिन् श्लोके श्रीकृष्णः अर्जुनं बोधयति—पार्थ! तव अधिकारः कर्मकरणे एव अस्ति, किं कर्म कुर्यात् इति त्वत् अधीनं वर्तते, किन्तु कस्य कर्मणः

किम् फलं भवेत् अस्मिन् विषये कदापि तव अधिकारः न अस्ति। तस्मात् कदापि फलहेतोः कर्म न कुरु, परमं कर्म अकरणे अपि ते आसक्तिः न भवेत्।

**18. श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥**

**संस्कृतार्थ**—अस्मिन् श्लोके श्रीकृष्णः अर्जुनं उपदिशति यत् यः जनः संयतेन्द्रियः श्रद्धावान् च अस्ति स ज्ञानं लभते। ज्ञानं प्राप्त्वा स शीघ्रम् एव परां शान्ति प्राप्य सुखं अनुभवति।

**19. यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।**
**शभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥**

**संस्कृतार्थ**—अस्मिन् श्लोके श्रीकृष्णः अर्जुनं उपदिशन् कथयति यत्–हे अर्जुन! यः मनुष्यः स्वाभीष्टं प्राप्य न प्रसीदति, न द्वेषं करोति, न शोचति, न कामनां करोति, शुभाशुभयोः कर्मयोः परित्यजति स भक्तिमान् जनः मम अति प्रियः भवति।

**20. योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।**
**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥**

**संस्कृतार्थ**—भगवान् श्रीकृष्णः अर्जुनम् उपदिशन् कथयति यत्–भो धनञ्जय! आसक्तिं त्यक्त्वा एकाग्रचित्तं भूत्वा स्वकर्माणि कुरु, तयोः सिद्धसिद्ध्योः समभावं धरस्व। एतद्धि योगः उच्यते।

21. समः शत्रौ च मित्रे च तथा मानापमानयोः।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः॥

**संस्कृतार्थ**—अस्मिन् श्लोके श्रीकृष्णः अर्जुनं कथयति यत् यः जनः रिपौ सुहृदि च समानभावेन वर्तते, यः सम्माने अपमाने च समान भावेन आचरति, न सम्माने हृष्यति न च अपमाने खिद्यति। यः शीते ग्रीष्मे, सुखे दुःखे च समानं व्यवहरति, यस्य कस्मिन् अपि विषये आसक्तिः नास्ति स एव जनः मे प्रियः भवति।

22. प्रवहतु गङ्गा पूततरङ्गा प्रथयन्ती महिमानम्।
गायतु गीता कर्ममहत्त्वं योग-क्षेम-विधानम्॥

**संस्कृतार्थ**—अस्मिन् श्लोके कामयते यत् अस्यां पृथिव्यां पवित्रा गङ्गा प्रवहतु, गीता च योगक्षेमविधानं कर्म महत्त्वं सुगीतानि गायतु, कल्याणं करोतु।

23. सर्वे ज्ञान-धना बुध-वर्या मान-धना रण-धीराः।
स्वर्ण-धना व्यवसायि-धुरीणास्तथा श्रम-धना वीराः॥

**संस्कृतार्थ**—अस्मिन् श्लोके कामयते यत् संसारे अस्यां पृथिव्यां सर्वे जनाः विद्वान्सः भवन्तु, स्वाभिमानिनः, रणधीराः, धनधान्येन सम्पन्नाः व्यवसाये अग्रगण्यः परिश्रमशालिनः भवन्तु ये नवीनं समाजं निर्माणं कुर्वन्तु।

24. तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन् केनचित्।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः॥

**संस्कृतार्थ**—अस्मिन (श्लोके श्रीकृष्ण अर्जुनं कथयति यत् यः नरः स्वनिन्दां-श्रुत्वा दुःखी न भवति, प्रशंसां श्रुत्वा प्रसन्नः न भवति, येन केनचित् वस्तुना यः सन्तुष्टः भवति गृहत्यागं करोति, स्थिरमतिः भक्तिमान् स नरः मे प्रियः अस्ति।

25. सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति॥

**संस्कृतार्थः**—अस्मिन् श्लोके महर्षिः कथयति—सर्वलक्षणानिरहितोऽपि यः नरः सदाचारी भवति, ईर्ष्या शून्यः भवति स शतवर्षपर्यन्तम् सुखेन जीवति।